# श्रीदेवराजगुरुभिरनुगृहिता

# ॥ श्रीवरवरमुनिविषयमुक्तकम् ॥

## Shri Varavaramuni Vishaya Muktakam

प्रपद्ये पदपद्मानि परमप्रेमसम्पदाम् ।
सौम्यजामातृयोगीन्द्रचरणैकजुषां सताम् ॥१ ॥

संपत्स्वरूपानुगुणैव यस्मिन् सर्वोत्तरो यत्र मनःप्रसादः ।
सद्भिस्समं देव तमेव देशं प्राप्तुं प्रपद्ये भवदङ्घ्रिमूलम् ॥२ ॥

यन्मूलमाश्वयुजमास्यवतारमूलं कान्तोपयन्तृयमिनः करुणैकसिन्धोः ।
आसीदसत्सु गणितस्य ममापि सत्तामूलं तदेव जगसभ्युदयैकमूलम् ॥३ ॥

श्रीमद्रङ्गं जयतु परमं धाम तेजोनिधानं
भूमा तस्मिन् भवतु कुशली कोऽपि भूमासहायः ।
दिव्यं तस्मै दिशतु विभवं देशिको देशिकानां
काले काले वरवरमुनिः कल्पयन्मङ्गलानि ॥४ ॥

नचेद्रामानुजेत्येषा चतुरा चतुरक्षरी ।
कामवस्थां प्रपद्यन्ते जन्तवो हन्त मादृशाः ॥५ ॥

पुण्याम्भोजविकासाय पापध्वान्तक्षयाय च ।
श्रीमानाविरभूद्भूमौ रामानुजदिवाकरः ॥६ ॥

तृणीकृतविरिञ्चादिनिरङ्कुशविभूतयः ।
रामानुजपदाम्भोजसमाश्रयणशालिनः ॥७ ॥